# Shri Vivekananda Ashtakam

# શ્રીવિવેકાનન્દાષ્ટકમ્

## Document Information

Text title : Shri Vivekananda Ashtakam

File name : vivekAnandAShTakam.itx

Category : deities_misc, gurudev, rAmakRiShNa, aShTaka

Location : doc_deities_misc

Author : Kalipadabandyopadhyaya

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

Shri Vivekananda Ashtakam

# શ્રીવિવેકાનન્દાષ્ટકમ્

દધદ્ દિવ્યજ્યોતિઃ પરમરમણીયં નયનયોઃ
    પ્રસન્નાસ્યઃ સૌમ્યો મુનિકનકશોભાધરવપુઃ ।
સુધીઃ સત્યદ્રષ્ટા ભુવનવરણીયઃ શ્રુતિધરો
    વિવેકાનન્દોઽસૌ મનુજતનુધારી સ્મરહરઃ ॥ ૧॥

કિશોરો ધ્યાનસ્થો ભુજગભયશૂન્યો હ્યવિચલો
    યુવા દણ્ડી વૈશ્વાનરસદૃશદીપ્તિર્ભુવિ ચરન્ ।
સ્વધર્મ-ભ્રષ્ટાનાં કલુષિત-ધિયાં ત્રાણનિરતો
    વિવેકાનન્દોઽસૌ ગહનતિમિરે ભાસ્વરરવિઃ ॥ ૨॥

ગુરોરન્તેવાસી પરમપુરુષસ્ય પ્રિયતમો
    નરેન્દ્રઃ સર્વેષામવનતજનાનામભયદઃ ।
પ્રતિજ્ઞાયાં ભીષ્મો વિપદિ ચ મહીધ્રોન્નતશિરો
    વિવેકાનન્દોઽસૌ કુસુમલલિતો વજ્રકઠિનઃ ॥ ૩॥

ગૃહે વિત્તાભાવાદ્વિચલિતમનાઃ શાન્તિરહિતો
    ગતો બારં બારં ગુરુવચનતો માતૃસદનમ્ ।
“ધનં માતર્દેહી” ઇત્યનુનયવચસ્તુ પ્રતિહતં
    વિવેકાનન્દઃ કિં ભવતિ ધનતૃષ્ણાવશગતઃ ? ॥ ૪॥

ગુરોઃ પાદં ધ્યાત્વા કિમપિ નવતેજો હૃદિ વહન્
    મહાસિન્ધું તીર્ત્વા નિખિલજગતો ધર્મસદસિ ।
નવીનઃ સંન્યાસી વિજિત જયમાલ્યો બહુમતો
    વિવેકાનન્દોઽસૌ ભુવનવિજયી ભારતનિધિઃ ॥ ૫॥

અવિદ્યાયા બૈરી શ્રુતિવિહિતવિદ્યામધુકરઃ
    સુખે ચાનાસક્તઃ પરમપદચિન્તાસ્થિરમતિઃ ।
જગત્ સેવા મન્ત્રૈર્જગદધિપતેઃ પૂજનપરો
    વિવેકાનન્દોઽસૌ ભુવિ સુવિરલો માનવગુરુઃ ॥ ૬॥

દરિદ્રાણાં બન્ધુર્નિખિલમનુજાનાં પ્રિયકરઃ
    સમો જ્ઞાને કર્મણ્યવિચલિતભક્ત્યાં ગુરુપદે ।
સમઃ શત્રૌ મિત્રેઽપ્રતિમમહિમોદ્દીપ્તતપનો
    વિવેકાનન્દો મે હૃદયગગને ભાતુ સતતમ્ ॥ ૭॥

અભય વરદ મૂર્તિઃકાલિકા-વિશ્વધાત્રી-
    ચરણકમલ સંસ્થૌ શારદા-રામકૃષ્ણૌ ।
શરણગત વિવેકાનન્દ સાનન્દમૂર્તિઃ
    ભવભયહરશૂન્યં પશ્ય રે મુગ્ધનેત્રે ! ॥ ૮॥

ઇતિ શ્રીકાલીપદબન્ધોપાધ્યાયવિરચિતં “શ્રીવિવેકાનન્દાષ્ટકમ્” સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan

---

*Shri Vivekananda Ashtakam*

pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*